बिभर्ति शिरसा नित्यं द्विसप्तभुवनात्मकम् ॥५१०॥

ब्रह्माण्डं योऽखिलाधारं[5] तस्मै शेषत्मने नमः।

परान्तपरमानन्दं[6] पित्वा दिव्यैकसाक्षिकैः[7] ॥५११॥

नृत्यत्यनन्तमहिमा तस्मै रुद्रात्मने नमः।

योऽन्तरासर्वभूतानां नियन्ता तिष्ठतीश्वरः ॥५१२॥

तं सर्वसाक्षिणं देवं नमस्ये भवतस्तनुम्।

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसन्धिषु[8] ॥५१३॥

कुक्षौ समुद्राश्चत्वारस्तस्मै व्योमात्मने[9] नमः।

यं विनिद्रा जितश्वासाः सन्तुष्टाः समदर्शिनः ॥५१४॥

ज्योतिः पश्यन्ति युञ्जान[10] स्तस्मै योगात्मने नमः।

यथा सन्तरते मायां योगी सङ्क्षीणकल्मषः ॥५१५॥

अपरान्ता[11] मपर्यन्तां[12] तस्मै विश्वात्मने[13] नमः

यस्य भासा विभातीदं तदहं तममः परम् ॥४१६॥

---

[1] देवं h यत् i स्थितः k वक्त्रनमो j खिलधुरं a यः परान्ते परानन्त b साक्षिणम् i सिन्धुषु l तोयात्मने e, सोमात्मने c यज्ञानात् d अपरान्तं i अपर्यन्तं n विद्यात्मने m पायात्मने h

प्रपद्ये तत्परं तत्त्वं तद्रूपं परमेश्वरम्।
नित्यानन्दं निराधारं निष्कलं परमं शिवम्[1] ॥५१७॥
प्रपद्ये परमात्मानं भवन्तं ब्रह्मसंज्ञकम्[2]।
एवं स्तुत्वा महादेवं ब्रह्मा तद्भावभावितः ॥५१८॥
प्राञ्जलिः प्रणतस्तस्थौ गृह्णन् ब्रह्म सनातनम्।
स्तोत्रेणानेन चान्येन स्तुत्वोच्चैः प्रणमेच्छिवम् ॥५१९॥
दण्डप्रणामश्चाद्यः[3] स्यात्प्रणामोऽथ नमस्कृतिः।
अष्टाङ्गैरथ पञ्चाङ्गैस्त्रिभिरङ्गैस्त्रिधा स्मृतः ॥५२०॥
पुष्पैरञ्जलिमापूर्य समुच्चार्य दिगम्बरम्।
नमोन्तं भक्तिसंयुक्तः शिवं सञ्चिन्त्य मन्त्रवित् ॥५२१॥
दत्त्वा देवस्य पुरतः पुष्पं तत्प्रणमेद्यदा[4]।
शिरसा हस्तयुग्मेन कर्णाभ्यां चिवुकेन च ॥५२२॥
वाहुभ्यां भुवमष्टाङ्गैः संस्पृश्य प्रणमेच्छिवम्[5]।
शिरो हस्तौ च जानुभ्यां पञ्चाङ्गैः प्रणमेच्छिवम् ॥५२३॥
शिरसा हस्तयुग्मेन त्रिभिरङ्गैः नमोच्छिवम्।
यथोचितं[6] नमेदेतैर्देशकालाद्यपेक्षया ॥५२४॥
ततः प्रदक्षिणं कुर्यात्सव्यासव्यविधानतः।
मूलमन्त्रं जपेन्मौनी गुर्वादीनामलङ्घयन्[7] ॥५२५॥

---

[1] परमेश्वरम् k [2] युगसञ्ज्ञिकम् i [3] प्रमाणमाद्यः a [4] सदा l [5] परमेश्वरम् i [6] यथार्च्चितं e
[7] लङ्घयेत् d

छायां च सोमसूत्रं च जन्तून्परिहरन्[1] शनैः।
शिवं प्रदक्षिणीकृत्य दृष्ट्वा देवं प्रणम्य च ॥५२६॥
सव्यापसव्यमार्गेण मृदुगत्या प्रदक्षिणम्।
यथासम्भवतः कुर्यात्सव्यासव्यविधानतः ॥५२७॥
यथासम्भवतः कुर्याच्छिवं ध्यायन्यथोक्तवत्।
पाद्यमाचमनं चार्घ्यं पुष्पं धूपमथाचमम् ॥५२८॥
दीपमाचमनं दत्त्वा दद्यात्पुष्पाञ्जलित्रयम्।
प्रणम्य शिवहोमार्थमनुज्ञां देहि मे प्रभो ॥५२९॥
इति सम्प्रार्थ्य देवाज्ञां शिरसा धारयेत्सुधीः।
यद्वा होमासमर्थस्तु तदा शर्वं विसर्जयेत् ॥५३०॥
समाधिधारणध्यान[2] जपस्तोत्रा[3] दिभिर्बुधः।
स्वमूर्तौ गुरुमूर्तौ वा पुस्तके सलिलेऽनले ॥५३१॥
चित्रादौ क्षणिके लिङ्गे सदा शम्भुं समर्चयेत्।
असम्पूज्य शिवं मन्त्री नान्यत्कर्म समाचरेत् ॥५३२॥
असम्पूज्य न भुञ्जीत यावज्जीवमिति स्थितिः ॥५३३॥

श्रीकृष्णशैवागमचक्रवर्तिनां[4]
शिष्येण शैवागमतत्ववेदिना[5]।
श्रीविश्वनाथेन सुर्यकर्मणा[6]
शैवार्चनं सङ्ग्रथितं यथागमम् ॥५३४॥

इति श्री शुद्धशैवागमाचार्य[7] श्री कृष्णयोगीन्द्रशिष्येणोभय वेदान्तिभास्करसूनुना कृताग्निष्टोमेन विश्वनाथेन विरचित सिद्धान्तशेखरे नित्यकाण्डे शिवार्चनविधानं[8] नाम द्वितीयः परिच्छेदः

---

[1] परिहरेत् d [2] ज्ञान a [3] होम a [4] चक्रवर्तिना h [5] वेदिनाम् k [6] सदाहिताग्निना e
[7] चार्येण i [8] विधानो l

अथाग्निकार्यादिविधानम्

ततो[1] गृहीतशैवाङ्गः सामान्यार्घ्यकरो[2] गुरुः
होमागारं ससंभारं प्रयायात्स[3]प्रदक्षिणम् ॥१॥
कुण्डनाभिं[4] पुरस्कुर्वन्तुपविष्ट उदङ्मुखः।
साधनं सन्निधीकृत्य संस्कुर्यात्कुण्डसंस्कृतीः[5] ॥२॥
निरीक्ष्य प्रोक्ष्य सन्ताड्य समभ्युक्ष्य यथाक्रमम्।
खड्गेन खननोद्धारपूरणानि[6] सभीकृतिम् ॥३॥
कुर्वीत वर्मणा सेकं कुट्टनं च शराणुना[7]।
सम्मार्जनं समालेपं कलाभिस्तु कलात्मकम्[8] ॥४॥
त्रिसूत्री[9]वेष्टनं कुण्डे कवचेन समाचरेत्।
हृदा सम्पूज्य[10] तत्कुण्डं तत्रि[11] रेखा उदङ्मुखाः ॥५॥
तिस्रः[12] पूर्वाननना ह्येता इषुणैकेन पर्ययात्।
त्रिभिर्दर्भैः प्रकुर्वीत वज्रीकरणसंज्ञकम्[13] ॥६॥
दर्भैरुत्तरपूर्वाग्रैश्चतुर्भिः शस्त्रमन्त्रितैः[14]।
मध्ये चतुष्पदं कुर्यात्तद्वत्कुण्डेऽक्षपाटकम्[15] ॥७॥
एतेऽष्टादशसंस्कारा: कुण्डसंशुद्धिहेतवः।
कुण्डस्य पूर्वदिग्भागे शुष्कगोमयमण्डलम् ॥८॥
कृत्वा त्रिविष्टरं दत्त्वा ब्रह्माणं प्राग्वदर्चयेत्।
कुण्डपश्चिमदिग्भागे बाह्यतो विष्टरस्य च ॥९॥

---

[1] अथो a [2] न्यार्घ्यं करोति यः b [3] प्रागारभ्य c [4] कुण्डे e [5] संस्कृतिम् d, मन्दिरात् f, मादरात् i, [6] पूरणादि a [7] शरासना l [8] कलात्मताम् i [9] त्रिसूत्र b [10] तत्पूज्य n [11] तत्र m
[12] तिस्रः पूर्वाननामेकामिषुणा वा विपर्ययात् c [13] संस्मृतम् m [14] मन्त्रतः n
[15] कम्ठेऽक्षपाठकम् a, पाटनम् n

प्रणीता[1]चमसौ वापि पयःपूर्णौ प्रकल्पयेत्।
निक्षिपेदक्षतं पुष्पं तिलांस्तत्र पवित्रकम् ॥१०॥
तत्र विष्णुं समभ्यर्च्य प्रार्थयेद्ब्रह्मकेशवौ।
भो भो युष्म[2]त्प्रसादेन यज्ञो निच्छिद्रतोऽस्तु मे[3] ॥११॥
विष्टरं रुद्रकण्ठाग्रं[4] कुण्डमध्ये विनिक्षिपेत्।
तत्र वागीश्वरीं देवीं ऋतुस्नातां सुयौवनाम् ॥१२॥
नीलोत्पलदलाभासां पीनोत्तुङ्गपयोधराम्।
कृशमध्यां विशालाक्षीं नितम्बभरमन्थराम् ॥१३॥
उत्तानशायिनीमीशकाष्ठशीर्षां दिगम्बराम्।
सर्वलक्षणसम्पन्नां शिवाग्रेः[5] सूतिकाङ्क्षिणीम् ॥१४॥
वागीश्वरं तया सार्धं रिरंसुं नीलविग्रहम्।
यदि वाकाशसङ्काशं संश्लिष्टौ तौ हृदार्चयेत् ॥२५॥
दर्शयेद्योनिमुद्रां च लिङ्गमुद्रां तयोर्हृदा।
तदा रतिस्तयोर्यावत्तावदग्निमथाहरेत् ॥२६॥
उत्तमोऽरणिसम्भूतो मध्यमः सूर्यकान्तजः।
अधमः श्रोत्रियागारान्निजागारादिजोऽनलः ॥२७॥
कृष्णाजिनं समास्तीर्य वर्मणा शुद्धभूतले।
अरणिं तत्र गायत्र्या शम्भुना चोत्तरारणिम् ॥२८॥

---

[1] प्रणीतां a [2] विष्णो a [3] यं मृतीपञ्चदस्तुमे b [4] रुंद्रकाडाग्रं f [5] शिवामौ c

प्रमन्थिं[1] शिखाया रज्जुं वर्मणा गन्धपुष्पकैः।
अभ्यर्च्य तानि सर्वाणि तत्तद्रूपाणि कल्पयेत् ॥१९॥
योजयेत्तानि तन्मन्त्रैर्यथायोगं सुयन्त्रकम्[2]।
शिवमन्त्रं जपन्मन्त्री जनये[3]ज्ज्वलनं ततः ॥२०॥
अर्ककान्तमणावर्कतूलयुक्तेऽर्क[4]दीधितौ।
विधृते मणिजो वह्निर्जायतेऽसौ[5] विशस्यते ॥२१॥
प्रबुद्धं शुद्धपात्रस्थं ज्वलनं विभजेद्विधा।
देवासुरविभागेन रक्षंशं निर्ऋतौ त्यजेत् ॥२२॥
देवांशमनलं शुद्धं चतुर्भिर्वीक्षणादिभिः।
संहारिण्या समादाय बिन्दौ वह्निं[6] नियोजयेत् ॥२३॥
भौतं[7] च बिन्दुजं वह्निं नियोजयेत्
एकीकृत्य त्रयं तत्र वह्नीनादाय[8] भावतः ॥२४॥
क्षियेच्च वह्निचैतन्यं वह्नावुद्भवमुद्रया।
अभिमन्त्र्य षडङ्गेन रक्षितं चावकुण्ठितम् ॥२५॥
सुधाभुद्रामृतीभूतं धेनुमुद्रा[9]प्ररोचितम्।
भूमिष्ठजानुको भूत्वा स्वयं वागीश्वरो भवन् ॥२६॥
प्रदक्षिणं त्रिधावर्त्य कुण्डस्य परितोनलम्।
स्रवद्धा[10] गीश्वरीयोनौ शिवबीजमिति स्मरन् ॥२७॥

---

[1] प्रमर्थिं e, प्रथमं d [2] सुधत्रकम् n [3] ज्वलये l [4] कुलयुक्त्वक् d [5] सापि e [6] विन्दुवह्नौ i
[7] भौमं च c [8] वह्निमादाय l [9] महामुदा c [10] स्वपेद्धा e

मूलमन्त्रं जपेन्मन्त्री कुण्डयोन्यूर्ध्ववर्त्मना।
गर्भनाडीरजः पद्मे प्रक्षिपेदात्मसम्मुखम् ॥२८॥
पाणिना साम्भसा योनिं निमृज्यादस्त्रमन्त्रतः।
प्रज्वाल्य चानलं तत्र शुष्कैर्यज्ञतरूद्भवैः ॥२९॥
केशकीटाद्यनिर्दुष्टैरुदबिन्दुं क्षिपेदथ।
प्रदद्याच्छौच[1]मस्त्रेण वस्त्रमाचमनं ततः ॥३०॥
ततः सम्पूजयेदग्निं षड्भिरङ्गैरथास्त्रतः[2]।
वध्नीयाद्गर्भरक्षार्थं दर्भजं कङ्कणं करे ॥३१॥
गर्भाधानस्य सिध्यर्थमग्नावाज्याहुतिं क्षिपेत्।
आज्येन पूजयेदग्निं नमोन्तकुसुमादिभिः ॥३२॥
हृदा दद्यात्तिलैः साज्यैः स्वाहान्तैराहुतित्रयम्।
ततः पुंसवनार्थाय तृतीये मासि कल्पिते ॥३३॥
अग्नावाज्याहुतिं[3] हुत्वा पुंसा पावकमर्चयेत्[4]।
तिलाहुतित्रयं दत्त्वा शिरसार्घ्यजलं क्षिपेत्[5] ॥३४॥
सीमन्तोन्नयनार्थाय षष्ठे मासि प्रकल्पिते।
अग्नावाज्याहुतिं हुत्वा घोरेणाभ्यर्च्य पावकम् ॥३५॥
जुहुयादाहुतीस्तिस्त्रः शिखाशम्वरतस्तिलैः।
वक्त्राङ्गकल्पनां कल्प्य वक्त्रोद्घाटननिष्कृतिम् ॥३६॥

---

[1] द्याच्छिव h नमोन्तं कुसुमादिभिः l [3] आज्वेनाग्नाहुतिं c [4] वामेनाग्निं प्रपूजयेत् e]
[5] वर्मणा तनयोदयम् l

दर्भेण शिखया वह्नावाहुतित्रितयं क्षिपेत्।
ततोऽग्नौ जातकर्मार्थं दशमे मासि कल्पिते ॥३७॥
वह्नावाज्याहुतिं हुत्वा पुंसा पावकमर्चयेत्[1]।
तिलाहुतित्रयं हुत्वा वर्मणा तनयोदयम् ॥३८॥
सञ्चिन्त्याथास्त्रतो देव्याः कङ्कणं मोचयेत्करात्।
अर्घ्ये मार्जनं दद्याद्देव्या गर्भमलापहम् ॥३९॥
करे कृतं स्मरेत्सूत्रं वर्मणा हेमनिर्मितम्[2]।
सद्यः सूतकशुध्यर्थं कुण्डं प्रोक्षेच्छराणुना ॥४०॥
अस्त्रेण ताडयेत्कुण्डं वह्निमभ्युक्षय वर्मणा।
जुहुयादथ शुध्यर्थं सहस्रं वा नवात्मना।
जुहुयात्समिधः पञ्च चतुर्विंशतिरेव वा ॥४१॥
षोडशाङ्गुलमात्रा वा यद्वा प्रादेशसम्मिताः।
अग्रमूलप्लुतघृतप्लवनानां[3] शराणुना ॥४२॥
लालापनुत्तये[4] मन्त्री सुसमिद्धे हविर्भुजि।
मेखलान्प्रक्षिपेद्द[5]र्भान् पूर्वाग्रानुत्तराग्रकान् ॥४३॥
अस्त्रेणास्तीर्य दर्भेषु विष्टरान् चतुरो[6] हृदा।
विन्यस्य तेषु पूर्वादि ब्रह्माणं शङ्करं हरिम् ॥४४॥
अनन्तं पूजयित्वाथ मेखलासु कुशान् हृदा।
आस्तीर्य तेषु परिधीन्त्रिन्यसेद्धृदयाणुना ॥४५॥

---

[1] घोरेणाभ्यर्च्य चार्चयेत् h [2] भस्मनिर्मितम् d [3] लपनानां d [4] ज्वालापनुत्तये l
[5] मेखलानां वहिर्द c दितरेत् e

लोकपालान्यजेत्तेषु प्राग्वत्तान्[1] प्रार्थतेदथ[2]।
भोभो ब्रह्मादयो देवा इन्द्राद्या लोकपालकाः ॥४६॥
निवार्य विघ्नसङ्घातं बालकं पालयिष्यथ।
शिवाज्ञां श्रावयित्वेत्थं कुर्यात्स्रुकस्रुवसंस्कृतिम् ॥४७॥
वीक्षणादिचतुःशुद्धिशोधितौ वर्मकुण्ठितौ।
ऊर्ध्वाध[3]च्छदनौ शिलष्टौ स्रुक्स्रुवौ सकुशौ हृदा ॥४८॥
गृहीत्वा[4] तापयेदग्नौ हुम्फडन्तास्त्रमन्त्रतः[5]।
दर्भाग्रैः स्रुक्स्रुवाग्रे त्रि[6]र्भ्रामयित्वा प्रमृज्य च ॥४९॥
संस्पृश्य तत्र विन्यस्येच्छिवतत्त्वं सबीजकम्।
कुशमध्यै[7] स्तयोर्मध्यं भ्रामयित्वा प्रमृज्य च ॥५०॥
स्पृष्ट्वात्र पूर्ववद्विद्यातत्त्वं बीजयुतं न्यसेत्।
कुशमूलैस्तयोर्मूलं भ्रामयित्वा[8] निमृज्य[9] च ॥५१॥
स्पृष्ट्वा तत्रात्मतत्त्वं तद्बीजयुक्तं न्यसेत्ततः।
स्रुचि शक्तिं न्यसेच्छक्त्या स्रुवे शम्भुं शिवाणुना ॥५२॥
वेष्टयित्वा तयोर्ग्रीवे त्रिभूत्र्या कवचाणुना।
आत्मनो दक्षिणे भागे स्थापयेत्तौ कुशास्तृते ॥५३॥
अर्चयेद्गन्धपुष्पाद्यैस्तौ तयोरिति संस्कृतिः।
उच्यतेऽथाज्यसंस्कारो गव्यमाज्यं विशोधितम् ॥५४॥

---

[1] प्रसभान् e [2] घाया d [3] ऊर्ध्वाधौ h [4] गृहीत्वोत्थाय h [5] स्रतस्त्रिधा k [6] स्रुवाग्रेति i
[7] मध्ये i [8] माभ्रमय्य a [9] प्रमृज्य l

निरीक्ष्य प्रोक्ष्य सन्ताड्य समभ्युक्ष्यावकुण्ठ्य च।
अस्त्रेण तापयेदग्नौ वर्मणोद्वासयेद्धृतम् ॥५५॥
स्वाङ्गं ब्रह्मयं ध्यात्वा[1] कुण्डस्योर्ध्वं प्रिधा घृतम्।
भ्रामयित्वाग्निदिग्भागे प्रतप्याज्य[2]लवं हृदा ॥५६॥
देर्भेण ब्रह्मणे दत्त्वा ततो ध्याये[3]त्स्वकां तनुम्।
विष्णुरूपामथैशान्यां प्रताप्षाज्यं च तल्लवम्[4] ॥५७॥
शिरसा विष्णवे मन्त्री दद्याद्दर्भाग्रतस्ततः।
स्वाङ्गं रुद्रमयं ध्यात्वा कुण्डयोनौ न्यसेद्धृतम् ॥५८॥
दक्षवामकराङ्गुष्ठानामिकाग्रधृतेन तत्।
पवित्रेण घृतं वह्निसम्मुखं शस्त्रतस्त्रिधा ॥५९॥
कुर्यादुत्प्लवनं चात्मसंमुखं प्लवनं[5] त्रिधा[6]।
प्रक्षिप्याग्नौ तत्पवित्रं रुद्रायाज्यलवं क्षिपेत् ॥६०॥
शिखाणुना कुशाग्रेण ज्वलद्दर्भं घृतेऽस्त्रतः[7]।
क्षिप्त्वा पवित्रयेदाज्यं नीराज्य ज्वलता त्रिधा ॥६१॥
दर्भाग्रे वर्मणा गर्भे[8] प्रक्षिपेत्तद्धविर्भुजि।
ज्वलदन्यकुशेनाज्यं सन्दीप्यास्त्रेण तं कुशम् ॥६२॥
क्षिप्त्वाग्नौ शोधयेदाज्यं दशधा वीक्षणादिभिः।
आज्याणुना तदभ्यर्च्य पवित्रं तत्र निक्षिपेत् ॥६३॥

---

[1] ज्ञात्वा l [2] प्रतापाज्य h, प्रतप्ताज्य i [3] ध्यात्वा k [4] पल्लवम् e [5] संप्लवं c [6] हृदा h
[7] स्मृतः a [8] दर्भं b

शुक्लकृष्णौ[1] घृते पक्षौ भागयोर्दक्षवामयोः।
तत्रेडां पिङ्गलां ध्यायेत्सुषुम्नामध्यतस्तयोः ॥६४॥
सम्पाताहुतयः कार्याश्चतस्नस्तत्र देवताः।
अग्निः सोमश्च तावग्निः[2] स्विष्टकृत्स्याच्चतुर्थकः ॥६५॥
प्रणवाद्याः सहृद्बीजाः स्वाहान्ताः शम्बराः क्रमात्।
अग्नेर्नेत्रत्रये वक्त्रे तत्प्रबोधाय होमयेत्[3] ॥६६॥
दक्षभागाद्गृहीत्वाज्यं वह्नेर्दक्षिणचक्षुषि।
जुहुयादग्नये स्वेति[4] स्रुवाज्यार्धं[5] हविर्भुजि ॥६७॥
हित्वाज्य[6]शेषमाज्यस्य दक्षभागे विनिक्षिपेत्।
सम्पाताहुतिमार्गोऽयं विज्ञेयस्तत्र कोविदैः ॥६८॥
वामभागाद्गृहीत्वाज्यं कृशानोर्वाम[7] चक्षुषि।
सोमाय स्वेति[8] जुहुयादाज्यार्धं कृष्णवर्त्मनि ॥६९॥
हित्वाज्य[9]शेषमाज्यस्य वामभागे विनिक्षिपेत्।
पक्षोऽयं शुक्लपक्षः स्यात्कृष्णपक्षे विपर्ययः ॥७०॥
घृतमध्याद्गृहीत्वाज्यं कृशानोर्मध्यचक्षुषि।
आज्यार्धं जुहुयादग्नीषोमाभ्यां[10] स्वेत्युषर्बुधे। ॥७१॥
हित्वाज्यं[11] मध्यतो दद्याद्धुतशेषं स्रुचिस्थितम्।
आज्यस्य दक्षिणाद्वामान्मध्यादादायःतद्धृतम् ॥७२॥

---

[1] वर्गौ f [2] तुर्वह्निः a, तोवह्निः d [3] होमयुक् l [4] स्वाहेति a [5] स्रुवेणाज्यं, स्रवदाज्यं [6] नेत्याज्य, h हेत्याज्य i [7] वह्नेर्दक्षिण k [8] स्वाहेति a [9] हेत्याज्य a [10] सोमाभ्यां a [11] हेत्याज्यं d [12] स्रुव e

वह्निवक्त्रेऽग्नये स्विष्टकृते स्वेति हुताशने।
घृताज्यं[1] जुहुयाद्याव[2]च्छेषमाज्यं विभावसौ[3] ॥७३॥
चतस्रो जुहुयादित्थं सम्पाताख्यघृताहुतीः[4]।
संस्कृताज्यलवक्षेपाद्धृतमन्यद्विशोधयेत् ॥७४॥
अभिमन्त्र्य घृतं सर्वमङ्गैः संरक्ष्य चास्त्रतः।
अवकुण्ठ्य तनुत्रेण धेनुमुद्रां च मूलतः ॥७५॥
दर्शयेच्च महामुद्रां शक्ति[5]शम्बरतो घृते[6]।
इत्याज्य[7]संस्कृतिः प्रोक्ता कथ्यते वक्त्रसंस्कृतिः[8] ॥७६॥
वक्त्राभिधारणं चाग्नेः[9] सन्धानं च मुखैकता।
सद्येन[10] जुहुयादाज्यं पश्चिमास्ये[11] हविर्भुजः ॥७७॥
वामेनोदङ्मुखे हुत्वा दक्षास्ये बहुरूपिणा।
पुंसा प्राग्वदनेऽथोर्ध्वसुखे चेशानमन्त्रतः ॥७८॥
एकैकया घृताहुत्या तिसृभिर्वाभिधारणम्।
कथ्यते वक्त्रसन्धानं पञ्चाज्याहुतयो यथा ॥७९॥
जुहुयादजवामाभ्यां स्रुवेणाज्यं तदास्ययोः।
जुहुयाद्वामघोराभ्यां तद्वक्त्रद्वितये घृतम् ॥८०॥
घोरतत्पुरुषाभ्यां तद्वक्त्रद्वन्द्वे घृतं क्षिपेत्।
जुहुयात्पुरुषेशाभ्यां वदनद्वितये धृतम् ॥८१॥

---

[1] घृतार्धं c [2] ध्येति b [3] त्रिभागके f [4] घृताहुतिः i [5] शक्तिः m, शक्तिं n [6] घृतम् l
[7] द्रव्याज्य h [8] संस्थितिः h [9] वक्त्रलाणाममिधार्याग्नेः k [10] आज्येन i [11] पश्चमाघ्यौं l

ईशेन जुहुयादाज्यं तद्वक्त्रे शिवपावके।
एका वा वक्त्रसन्धाने तिस्रो वाहुतयो मताः ॥८२॥
कथितं वक्त्रसन्धानं कथ्यतेऽथ मुखै[1]कता।
सद्यादिपञ्चवक्त्रेभ्यो घृतधारां क्षिपेद्यथा ॥८३॥
अग्निकोणमथारभ्य रुद्र[2]कोणान्तनीतया।
निर्ऋतेः कोणमारभ्य रुद्रकोणान्तनीतया।
कुर्वीतवदनैकत्वमविच्छिन्नाज्यधाराया ॥८४॥
अभीष्टवदने कुण्डप्रमाणेऽन्यानि संस्मरेत्।
अन्तर्गतानि वक्त्राणि यद्वैतद्वदनैकता ॥८५॥
नित्यकर्माणि शिष्याणां संस्कार[3] समयाह्वये।
सद्योजातमुखे न्यस्य ह्यन्तर्भूतानि भावयेत् ॥८६॥
आकर्षे[4] शान्तिके वश्ये पौष्टिके पाशशोधने।
सौभाग्ये सम्पदर्थादौ वामदेवमुखे तथा ॥८७॥
अन्तर्भूतानि कुर्वीत वक्त्राण्यन्यानि बुद्धिमान्।
मारणे स्तम्भने द्वेषे चोच्चाटे[5] पापनिष्कृतौ ॥८८॥
अघोरवदने न्यस्य ह्यन्तर्भूतानि भावयेत्।
घुटिकार्था[6]ञ्जने पाद[7]लेपे[8] शिष्यस्य जन्मनि ॥८९॥
नानाविद्यादि[9]विषये[10] पुरुषास्ये विभावयेत्।
अन्तर्भूतानि चत्वारि वदनानि तदा तदा ॥९०॥

---

[1] वदनै l [2] वायु d [3] संस्कारे d [4] आगृष्टे a, आलये h [5] च्चाटने k [6] घडिकार्धा i [7] दाले b [8] पये f [9] सिध्यादि m [10] विजये n

ईशानवदने मुक्तावन्तर्भूतानि भावयेत्।
अन्तर्भावं[1] विधायेत्थं तत्तदाशामुखं स्मरेत् ॥९१॥
ततोघृताहुती[2]र्नामकरणार्थं हविर्भुजि।
दत्त्वाऽथे[3]शानमन्त्रेण पूजयेज्जातवेदसम् ॥९२॥
तिलेनास्त्रेण जुहुयादाहुतीनां त्रय शुचौ[4]।
पावकोऽसि शिवाग्निस्त्वं नाम सर्वात्मना चरेत्। ॥९३॥
ततो वागीश्वरी वागीश्वरौ च पितरौ शुभौ।
हृदा समार्चितौ ध्यात्वा नमस्कृत्य विसर्जयेत् ॥९४॥
अथोच्यतेऽग्निजिह्वानां रूपस्थानादिनिर्णयः।
हिरण्या कनका रक्ता कृष्णा स्यादथ सुप्रभा ॥९५॥
षष्ठीस्यादतिरिक्ताख्या सप्तमी वहुरूपिणी।
हिरण्या हेमसङ्काशा कनका वज्रसन्निभा ॥९६॥
रक्ता बालार्कसदृशी कृष्णा नीलमणिच्छविः।
सुप्रभा। मौक्तिकच्छायातिरक्ता तु जपद्युतिः ॥९७॥
चन्द्राभा बहुरूपेति जिह्वानां रूपमीदृशम्[5]।
रुद्रेन्द्रवह्निनैर्ऋत्पवरुणानिलदिक्षु षट् ॥९८॥
मध्यतो बहुरूपेति जिन्ह्वास्थानानि कल्पयेत्।
वश्याकर्षयोर्हिरण्या[6] स्तम्भने कनका मता ॥९९॥

---

[1] भूतं n [2] हुतिः a [3] सद्याती b [4] शुचेः f [5] मन्दिरम् n [6] वश्याकर्वे हिरण्योक्ता n

तापे[1] रक्ता नियोक्तव्या कृष्णाख्या मारणे मता।
सुप्रभा शान्तिके शस्ताऽतिरक्तोच्चाटने परा[2] ॥२००॥
सर्वाकामफलावास्यै बहुरूपा निरूपिता।
सप्तैताः सात्विका जिह्वाश्चोदिता जातवेदसः ॥२०१॥
सप्तापि राजसा जिह्वाः कृशानोः सप्त नामतः[3]।
पद्मरागसुवर्णे च तृतीय रुद्रलोहिता ॥२०२॥
लोहिता स्या[4]त्तथा श्वेता धूमनी[5] सकरालिका।
सप्तैता राजसा जिह्वाः कीर्तिताः कृष्णवर्त्मनि ॥२०३॥
विश्वमूर्तिः स्फुलिङ्गिन्यै धूम्रवर्णा मनोजवा।
रोहिता च कारलाख्या काल्यग्येस्तामसाः स्मृताः[6] ॥२०४॥
षष्ठस्वरान्विता वर्णा नादबिन्दुकलान्विताः।
राजसास्तामसा जिह्वाश्चतुर्दश हविर्भुजः ॥२०५॥
नास्माकं सम्प्रदायोक्तास्तस्मात्ता[7] न निरूपिताः।
वक्ष्ये सात्विकजिह्वानां बीजवर्णानिमान् क्रमात् ॥२०६॥
सपशावलरायश्च[8] सप्तधा रेफसंयुताः।
षष्ठस्वरान्विता वर्णा नादबिन्दुकलान्विताः ॥२०७॥
बीजैरेतैर्हिरण्याद्या जिह्वाः सप्त क्रमाद्यजेत्।
घृतेन तर्पयेज्जिह्वाः स्वाहान्तैरुक्त[9]शम्बरैः ॥२०८॥

---

[1] स्तावे h [2] पुरः k पटुः h [3] ता मताः i, मातरः h [4] वा h [5] धूमिनिः k [6] मताः i
[7] तमसाः a [8] कलशाप्विव सायश्च a, विशालाष्पट्पयासं च l [9] मन्त्र h

अलं प्रासङ्गिकेनेति मध्यतो मध्यतो बहुरूपिणी।
जिह्वां सम्पूज्य सन्तर्प्य ततोऽन्नप्राशनादिकम् ॥१०९॥
चूडादिकरणार्थं च जुहुयादाहुती[1] हृदा।
तिस्रस्तिस्रस्तिलै[2]रग्नौ सर्वकर्म प्रपूरणीः[3] ॥११०॥
मूलेन वौषडन्तेन दद्यात्पूर्णाहुतिं ततः।
चर्वर्थं[4] धूपदीपार्थं होमार्थं कुण्डसञ्चये[5] ॥१११॥
कुण्डादग्निं समुद्धृत्य तत्तत्कार्यं समाचरेत्।
इत्यग्निसंस्कृतिः प्रोक्ता प्रथमा प्रृथुमार्गतः ॥११२॥
कथ्यते लघुमार्गेण शिवपावकसंस्कृतिः।
शुद्धमग्निं समादाय बिन्दुमग्नौ नियोज्यताम् ॥११३॥
नियोज्य जठरे वह्नौ त्रीनग्नीनेकतः[6] क्रमात्।
प्रक्षिप्य कुण्डवह्नौ तान् सद्याद्यैर्ब्रह्मभिर्यजेत् ॥११४॥
जुहुयादाहुतीः पञ्च तिलाद्यैर्मूलमन्त्रतः।
शिवाग्निरसि वह्ने त्वं हृदा नामेति कल्पयेत् ॥११५॥
ब्रह्मदीनर्चयेत्प्राग्वच्चतुरोनेतरानिति।
कथितो लघुसंस्कारः शिवाग्नेर्होमसिद्धये ॥११६॥
अथवा जुहुयादाज्यमात्मविद्याशिवाणुभिः।
त्रिभिः पूर्णाहुतिश्चाग्नौ शिवाग्नेर्लघुसंस्क्रिया ॥११७॥

---

[1] दाहुतिः h [2] कृत्वातिस्रस्तिलै c [3] पूरणिः c पूरणिम् e [4] चतुर्थं l [5] सञ्चयेत् c [6] नेत्रतः c
[7] पूर्णाहुतीरग्नौ h

परं ज्योतिर्मयं बिन्दुरूपं तेजोऽधिपं[1] शिवम्।
मूलेन योजयेदग्नौ शिवाग्निर्जायतेऽथवा ॥११८॥
एवमुक्तेन मार्गेण शिवाग्निं कल्पयेत्सुधीः।
अनुत्पाद्य शिवाग्निं तु हुतिर्भवति निष्फलम् ॥११९॥
शिवाग्निः प्रज्वलद्रक्तशरीरश्च त्रिलोचनः।
शिववद्वक्त्रहस्तादिर्ध्यातव्यो होमकर्मणि ॥१२०॥
शिवाग्नेरथवारूपभेदं वच्मि यथागमम्।
द्विमुखं चैकहृदयं चतुःश्रोत्रं द्विनासिकम् ॥१२१॥
षण्णेत्रं पिङ्गलं सप्तहस्ताढ्यं च त्रिमेखलम्।
त्रिपादं सुललाटं च सप्तजिह्वासमावृतम्[2] ॥१२२॥
चतुःशृङ्गं वृषारूढं बालादित्यसमप्रभम्।
उपवीतसमायुक्तं जटामुकुटमण्डितम् ॥१२३॥
दक्षभागे चतुर्हस्तं त्रिहस्तं[3] वामभागके।
स्रुक्स्रुवौ चाक्षमालां च शक्तिं दक्षिणगैः करैः ॥१२४॥
तोमरं व्यजनं हस्तैर्धृतपात्रं च वामकैः।
हिरण्यां कनकां रक्तां कृष्णां दक्षिणवक्त्रके ॥१२५॥
सुप्रभां चातिरक्तां च वामास्ये बहुरूपिणीम्।
दधानमग्निमध्ये तं शिवाग्निं पश्चिमोन्मुखीम्[4] ॥१२६॥

---

[1] वह्नीश्वरं n [2] सामायुतम् a [3] द्विहस्तं l [4] मो मुखीम् l

संस्मरेदिति विख्यातं शिवाग्निं च शिवगामे।
शिवाग्निरूपसम्बन्धा वक्ष्यन्तेऽन्येऽपि चाग्नयः ॥१२७॥
गार्हपत्यो दक्षिणाग्निस्तथा चाहवनीयकः।
सथ्यावसथ्यौ पञ्चैते श्रौतकर्मणि संस्कृताः[1] ॥१२८॥
शस्तः प्रदक्षिणावर्तः सुगन्धी धूमवर्जितः।
लेलिहानश्च सुस्निग्धः श्रुतिप्रच्छाहितध्वनिः ॥१२९॥
ऊर्ध्ववक्त्रः प्रसन्नार्चिः सपिण्डित[2]शिखोनलः।
एवं सिद्धिप्रदो ज्ञेयो विपरीतो न सिद्धिदः ॥१३०॥
क्षुद्रचिह्नमवेक्ष्याग्नेः शान्त्यर्थं जुहुयान्तदा।
सन्तर्प्य च तिलैराज्यस्तमग्निं प्रार्थयेदिति ॥१३१॥
अग्ने त्वमैश्वरं तेजः पवित्रं परमं यतः।
तस्मात्त्वदीयहृत्पद्मे पूजयामि[3] शिवं परम् ॥१३२॥
इति सम्प्रार्थ्य तं तस्य हृत्पद्मे पूर्ववच्छिवम्।
आधारादिपवित्रान्तं यजेद्ब्रह्माङ्ग[4]संयुतम् ॥१३३॥
शिवं सम्पूज्य[5] तत्रस्थं नाडीसन्धानमाचरेत्।
आत्मदेहाद्विनिष्क्रान्तां बिसतन्तु[6]निभां शुभाम् ॥१३४॥
सुषुम्नां शिवसंयुक्तां पुनरात्मगतां स्मरेत्।
तेन चाग्निस्थदेवेन सह संयोज्य तां[7] पुनः ॥१३५॥

---

[1] संस्मृताः h [2] सम्पीडित e 3 तर्पयामि a [4] ब्रह्मादि a [5] सम्प्राथ्य 1 [6] अत्र सन्तु h [7] त c

आत्मस्थमिति[1] तं[2] नाडीसन्धानं संस्मृतं बुधैः।
नाडीसन्धिं विधायेत्थं होमं शक्त्या समाचरेत् ॥१३६॥
सहस्रं वा शतं वापि तदर्धं चाष्टविंशतिम्।
स्वाहान्तं शिवमन्त्रेण हुनेदाज्या[3]हुतीस्ततः ॥१३७॥
ब्रह्माङ्गैस्तद्दशांशेन तत्तद्धोमं[4] समाचरेत्।
समिद्धोमे स्थितं ध्यायेदासीनं चरुणा हुतौ ॥१३८॥
घृतहोमे शयानं च ह्यासीनं शेषकर्मसु।
होमद्रव्यप्रमाणानि वक्ष्यन्तेऽथ यथागमम् ॥१३९॥
कर्षप्रमाणमाज्यं स्यान्मधुक्षीरं च तत्समम्।
शुक्तिमात्रं दधि प्रोक्तं पायसं प्रसृतेः समम् ॥१४०॥
पथ्यमात्राणि[5] भक्ष्याणि लाजा मुष्टिमिता मताः।
अन्नं ग्राससमं वार्धं शाकं[6] ग्रासार्धमात्रकम् ॥१४१॥
मूलानां तत्त्रिभागः स्यात्कन्दानामष्टमांशकः।
इक्षुः पर्व[7]प्रमाणं स्यादङ्गुलद्वितयं लता ॥१४२॥
प्रादेशमात्राः समिधो व्रीहीणां मञ्जरी समा।
तिलसक्तुकणादीनां मृगीमुद्रा प्रमाणतः ॥१४३॥
पत्रपुष्पफलानां तु[8] स्वमानाहुतिरिष्यते।
चन्द्रश्रीखण्डकस्तूरीकुङ्कुमागरुकर्दमाः ॥१४४॥

---

[1] आत्मार्थमिति h, आत्मस्वामितत्नाडीं k [2] तं n [3] जुहुयादा i [4] तद्वद्धोमं i
[5] पाद्यामात्राणि a [6] एकं i [7] फलं i [8] फलादीनां l

हरिमन्थसमं प्रोक्तं गुग्गुलुः बदराण्डवत्।
आहुतीनामिदं मानं वक्ष्ये द्रव्यफलं पृथक् ॥१४५॥
आज्याक्ततिलहोमेन कार्यसिद्धि[1]र्भवेद्ध्रुवम्।
ओदनेनान्नवृद्धिःस्याद्दध्ना चेन्द्रियवर्धनम् ॥१४६॥
आयुष्यं क्षीरहोमेन तेजोवृद्धि[2]र्घृतेन च।
धान्यैर्नानाविधैःसिद्धिः शान्तिः क्षीरयुतैस्तिलैः ॥१४७॥
रोगापहारो[3] दूर्वाभिः सर्वे वश्या भवन्ति हि।
कुमुदेन सुतावाप्तिरशोकैः प्रियसङ्गतिः ॥१४८॥
जातीकुसुम[4]होमेन वश्या गन्धर्वकन्यका।
नागपुष्पैरनेकास्त्री? चम्पकैरप्सरा वशा ॥१४९॥
वल्ली[5] पल्लव[6]होमेन भवेल्लक्ष्मीर्निरन्तरा।
पुण्डरीकैर्भवेद्राज्यं तदण्डै[7]र्यक्षिणी वशा ॥१५०॥
श्रेष्ठा गुग्गुलुना सिद्धिश्चूतपत्रै[8] र्ज्वरापहा।
रक्तपुष्पाणि वश्येदुस्युर्मधूनि लवणानि च ॥१५१॥
स्तम्भने पीतपुष्पाणि रक्तपुष्पाणि मारणे।
दाहने नीलपुष्पाणि धूम्रमुच्चाटने मतम् ॥१५२॥
तिलैश्च[9] वेतसैर्वृष्टिरित्यादिद्रव्यजं फलम्।
देशकालौ च मन्त्रौघं ज्ञात्वा होमं समाचारेत् ॥१५३॥

---

[1] सर्वसिद्धिः h [2] जयवृद्धिः h [3] रोगपापहरो k [4] मुकुल d [5] विल्व e [6] दलादि e [7] कदम्बैः c [8] पुष्पं a [9] हेतिश्च f

मृगीमुद्रा हे[illegible]मुद्रा[1] होमे सर्वफलप्रदा।
एवं यथोचितं शक्त्या हुत्वा पूर्णाहुतिं चरेत् ॥१५४॥
घृतेनापूर्य स्रुग्गर्त[2]मूर्ध्ववक्त्रे स्रुचि स्रुवम्।
निधायाधोमुखं न्यस्येत्स्रुवाग्रे[3] कुसुमाक्षतम् ॥१५५॥
पश्चाद्वामपुरोदक्षकराभ्यां शङ्खमुद्रया।
गृहीत्वा स्रुक्स्रुवौ मन्त्री स्रुगग्रन्यस्तलोचनः ॥१५६॥
ऋजुकायः प्रसन्नात्मा समपादः समुत्थितः।
नाभौ स्रुक्स्रुवयोर्मूलं निधायाथादि[4]शम्बरम् ॥१५७॥
वौषडन्तं त्रिमात्रान्तं मन्त्रोच्चारणमार्गतः।
उक्त्वा[5]नीत्वा तयोर्मूलं तिर्यग्वामस्तनान्तकम् ॥१५८॥
आज्यं रेचकनिष्क्रान्तं सुषुम्नामृतकल्पितम्।
स्थिरधीर्जुहुयादग्नौ यवप्रमितधारया ॥१५९॥
पूर्णाहुतिरियं प्रोक्ता सर्वकाम[6]प्रपूरणी।
हस्तोद्वर्तनताम्बूलमुखवासादिकं ततः ॥१६०॥
पवित्रं पूर्ववद्दत्वा सन्तुष्टं भावयेच्छिवम्।
विभूतिं मूलमन्त्रेण ललाटे धारये[7]त्तदा ॥१६१॥
अष्टपुष्पिकया देवं संहिताशम्बरैर्यजेत्।
पाद्यमाचमनं दद्यादर्घ्यं चापि पराङ्मुखम् ॥१६२॥

---

[1] पौत्रि b, पोत्रि f, पैत्रि c [2] तद्वक्त्रं l [3] स्रगग्रे h [4] याध्योदि h [5] हुत्वा c [6] कर्म c
[7] धाययेत् l

स्वामिन्[1] क्षमस्व देवेशेत्यभिधाय शिवं नमेत्।
ब्रह्माङ्गान्यथ संयोज्य शिवेन सह तं शिवम् ॥१६३॥
नाडीसन्धानतो वह्नेरादाथात्मनि योजयेत्।
ब्रह्मादिलोकपालेभ्यो बलिं दत्त्वा विसर्जयेत् ॥१६४॥
तिलैराज्येन जुहुयादाहुतीनां[2] चतुष्टयम्।
अग्निः सोमश्च तावग्निः[3] स्विष्टकृच्च चतुर्थकः[4] ॥१६५॥
घृतेन जुहुयादेतैश्चतुर्भिः शिवपावके।
ततश्चण्डं समावाह्य साङ्ग सम्पूज्य तर्पयेत् ॥१६६॥
विसृज्य तं ततो वह्निं रक्षेद्वा विसृजेत्तदा[5]।
रक्षितेऽग्नौ तु संस्कारः प्रत्यहं नेष्यते बुधैः ॥१६७॥
कुण्डस्यास्य चतुःशुद्धिरुपलेपनपूर्वकम्।
विसृष्टेऽग्नौ भवेत्सर्वसंस्कारः पूर्वचोदितः ॥१६८॥
ततः कुण्डाग्निदिग्भागे कुर्यान्मण्डलकद्वयम्।
रुद्राश्च मातरश्चाथ गणा यक्षा ग्रहाः सुराः ॥१६९॥
राक्षसाश्च तथा नागा नक्षत्राण्यथ राशयः।
विश्वेदेवाः क्षेत्रपालो देवाः प्रथममण्डले ॥१७०॥
दिक्षु कोणेषु तत्स्थाने चान्तःकोणेषु च[6] क्रमात्।
प्रागुक्ता लोकपालास्तु द्वितीये मण्डले मताः ॥१७१॥

---

[1] साङ्गं l [2] व्याहृतीनां c [3] तथावह्निः e, वाय्वग्निः l [4] चतुष्ठयः h [5] तथा d, सदा e [6] तत् a

रुद्रादीन् लोकपालांश्च तत्राभ्यर्च्य यथाक्रमम्।
चरुणा जलमिश्रेण स्वाहान्तं बलिमाचरेत् ॥१७२॥
तान्विसृज्य विनिर्गत्य बहिर्गोमयमण्डले।
श्वभूत[1]पतितप्रेतकाकादिभ्यो बलिं क्षिपेत् ॥१७३॥
ये रुद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः।
मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ॥१७४॥
विघ्नरूपाः स्थिताश्चान्ये दिग्विदिक्षु स्थिताश्च ये।
सर्वे सुप्रीतसनसः प्रतिगृह्णन्तिवमं बलिम् ॥१७५॥
सिद्धिं जुषन्तु मे नित्यं[2] भयेभ्यः पान्तु मां सदा[3]।
दद्यादनेन मन्त्रेण सर्वदिक्षु बलिं सदा ॥१७६॥
शुभं भवन्तु[4] गोविप्राजन्येभ्यश्च सर्वदा।
इत्युक्त्वाथ विसृज्यार्घ्यं पादप्रक्षालनं चरेत् ॥१७७॥
आचम्य सकलीकृत्य प्रविश्यान्तः शिवान्तिके।
सामान्यार्घ्यं पुनःकुर्त्या[5]दष्टपुष्पैः शिवं[6] यजेत् ॥१७८॥
प्राग्वत्पाद्यादिकं दद्या[7]च्छिवायावरणैः सह।
आगमोक्तेन मार्गेण कुर्यान्नित्योत्सवं तथा ॥१७९॥
शिवाय कारयेन्नृत्तं पुरतः शास्त्रचोदितम्।
ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या वित्तनुसारतः ॥१८०॥

---

[1] श्वभृति a [2] नः क्षिप्रं d [3] नित्यशः l [4] वहतु c [5] दद्यात् e, कृत्वा c, [6] पुष्पिकया h
[7] तद्द्यात् k

पूजाहोमादिजनितं फलं पुष्पजलान्वितम्।
प्रस्फुरत्तारकाकारं दद्यादुद्भवमुद्रया ॥१८१॥
पूजाजपाग्निकार्याद्यैः सुकृतं यन्मयार्जितम्।
तत्फलं परमेशान मया तुभ्यं समर्पितम्[1] ॥१८२॥
इत्युक्त्वा मूलमन्त्रेण स्वाहान्तं वरदे करे।
जपप्रदानमार्गेण शिवाय विनिवेदयेत् ॥१८३॥
न्यूनादिदोषमोक्षार्थं प्रजपेद्घोरशम्वरम्।
अष्टोत्तरशतं वाथ विदध्यादष्टविंशतिम् ॥१८४॥
जपपुण्यमघोरस्य पञ्चाग्वदर्घ्यजलान्वितम्।
यत्किञ्चित्कर्म[2] हे[3] देव सदा[4] सुकृतदुष्कृतम् ॥१८५॥
तन्मे शिवपदस्थस्य भुङ्क्ष्व क्षपय शङ्कर।
न्यूनं वाप्यधिकं वापि यन्मया मोहतः कृतम् ॥१८६॥
तत्सर्वं परमेशान परिपूर्णं सदास्तु[5] मे।
श्लोकद्वयं समुच्चार्य तच्छिवाय समर्पयेत् ॥१८७॥
बिन्दुरूपमथात्मानं देहादादाय पूर्ववत्।
शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ॥१८८॥
शिवो जयति सर्वत्र यः शिवः सोऽहमेव तु।
श्लोकमेतं समुच्चार्य तं शिवाय समर्पयेत् ॥१८९॥

---

[1] तदर्चितम् I [2] कुर्म c [3] भो e [4] मया d [5] तदस्तु d

संहारमुद्रयादाय चात्मानं च समर्चयेत्
अष्टपुष्पिकया देवं प्राग्वत्सम्पूजयेत्ततः।
प्राग्वदाचमनं दद्याच्छिवायावरणैः सह ॥१९०॥
पराङ्मुखाख्यमर्घ्यं[1] तु सद्योजातादि पञ्चसु।
उत्तमाङ्गेषु देवाय स्वहातं मूलमन्त्रतः ॥१९१॥
दद्यात्सावरणायाथ शक्तितत्त्वान्तगोचरम्।
यद्वावरणदेवेभ्यो पृथक् संहारमार्गतः ॥१९२॥
अस्त्रेभ्यो लोकपालेभ्यश्चण्डादिभ्यः पराङ्मुखम्।
दद्याद्विद्येश्वरेभ्योऽर्घ्यमङ्गब्रह्मभ्य एव च[2] ॥१९३॥
ततः पुष्पाञ्जलिं दत्त्वा क्षमस्व शिवसुव्रत।
हुम्फडन्तास्त्रमन्त्रेण देवानावरणस्थितान् ॥१९४॥
पुष्पक्षेपात्सुमुथाप्य यथा संयोजयेच्छिवे।
शिवमूर्तौ प्रभापुञ्जविलीनावरणामरान् ॥१९५॥
मूर्तिमन्त्रेण भावेन पुष्पमारोप्य संस्मरेत्।
मूर्तियुग्मं शिवेनाथ शिवे पुष्पेण योजयेत् ॥१९६॥
निरोधयेच्छिवं लिङ्गे स्वेष्ट[3]निष्ठुरयाधुना।
धेनुमुद्रां महामुद्रां प्राग्वत्सन्दर्शयेच्छिवे ॥१९७॥
लिङ्गात्सावरणाद्देवं स्थण्डिलात्क्षणिकादिकात्।
संहारमुद्रयादाय स्वहृत्यब्जे नियोजयेत् ॥१९८॥

---

[1] दद्यात्परङ्मुखार्घ्यं d [2] अन्ततः d [3] स्पष्ट c

गुर्वादिद्वार[1] पालेभ्यो दद्यादर्घ्यं पराङ्मुखम्।
गुरून्[2] गणपतिं वास्तुनाथं ब्रह्माणमस्त्रकम् ॥१९९॥
सुबाहुं विमलं सूर्यतनयां च विसर्जयेत्।
महाकालमथो गङ्गां नन्दिनं च हरिप्रियम् ॥२००॥
भारतीं गणपं चैव संहारिण्योपसंहयेत्।
कुर्यात्करान्गविन्यासं पूर्ववत्संहिताणुभिः ॥२०१॥
चण्डार्चनं ततः कुर्यात्तत्स्वरूपं निरूच्यत्।
यागगेहेशदिग्भागे प्रलिप्ते धेनु[3]मण्डले ॥२०२॥
चन्द्रार्धमण्डले वापि पुण्डरीकाङ्कमण्डले।
पीठे वा प्रतिमायां वा षहुत्थासनमर्चयेत् ॥२०३॥
तत्र चण्डेश्वरं कृष्णं रुद्रवह्निसमुद्भवम्।
चतुर्वक्त्रं चतुर्बाहुं जटाखण्डेन्दुमण्डितम् ॥२०४॥
दंष्ट्रालं तुण्डनिष्ट्यूतं महाज्वालाविराजितम्।
फणि[4]कङ्कणकेयूरहार[5]यज्ञोपवीतिनम् ॥२०५॥
रक्तद्वादशनेत्राढ्यं दक्षे साक्षत्रिशूलकम्।
वामे कमण्डलुं दम्डं[6] दधानं भक्तवत्सलम् ॥२०६॥
बद्धपद्मासनं ध्यायेद्धवलाम्भोजमध्यगम्।
आवाह्य चण्डमन्त्रेण साङ्गं चण्डेश्वरं यजेत्[7] ॥२०७॥

---

[1] गुर्वाद्यमर a [2] गुरुं l [3] ङ्क d [4] पाणी l [5] नाग n [6] टङ्कं n [7] सम्बूजयेत्सुधीः m

सत्त्या मूलजपं कुर्यादङ्गानां तद्दशांशतः।
जपं समर्प्य[1] चण्डाय तदङ्गेभ्यो निवेदयेत् ॥२०८॥
धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकम्।
अन्यदन्नादि[2]पानीयताम्बूलं गन्धपुष्पकम् ॥२०९॥
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तदा यथा।
लेह्यचोष्यान्नपानादिताम्बूलं सृग्विलेपनम् ॥२१०॥
निर्माल्यभोजनं तुभ्यं प्रदत्तन्तु शिवाज्ञया।
श्लोकमेतं समुच्चार्य तस्मै दद्यान्तदादिना ॥२११॥
सर्वमेतत्क्रियाकाण्डं मया चण्ड तवाज्ञया।
न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे ॥२१२॥
इति सम्प्रार्थ्य चण्डेशं[3] दत्वाघर्यं च पराङ्मुखम्।
स्वमूर्तौ संहरेच्चण्डमथार्घ्यादि[4] विसर्जयेत् ॥२२३॥
निर्माल्यं सकलमपास्य गोमयेन संलिप्य[5] यजनभुवं[6] सुगन्धिगन्धैः।
संसिञ्चेत्कुसुमसमूहमाप्रकीर्य धूपाद्यैर्बहलतरैश्च धूपयेत्तम्[7]॥२१४॥
प्रक्षाल्य पादौ सकरौ पयोभिराचम्य कुर्यात्सकलीकृतिं च।
शिवादिमन्त्रान् प्रजपेदितीत्थं सन्ध्यासु शम्भोर्यजनं विदध्यात्॥२१५॥
श्रीकृष्णशैवागमचक्रवर्तिनां[8] शिष्येण शैवागमतत्त्ववेदिना।
श्री विश्वनाथेन सदाहिताग्निना होमादिकर्माङ्गविधानमीरितम्॥२१६॥
इति श्री शुद्धशैवागमाचार्य श्रीकृष्णयोगीन्द्रशिष्येणोभ्यवेदान्ति भास्करसूनुना कृताध्वरेण विश्वनाथेन विरचिते सिद्धान्तशेखरे नित्यकाण्डे शिवाग्निकार्यादि[9] विधानं[10] नाम तृतीयः परिच्छेदः॥

---
[1] समर्च्य d [2] दन्यादि d [3] देवेशं 1 [4] मथाखदीन् h [5] संलिप्येत् h [6] गृहं k [7] यैनम् i
[8] चक्रवर्तिना c [9] शिवाग्निकार्य n [10] विधानो n

आगमार्चनविधानम्

अथागमार्चनं वक्ष्ये तद्भेदः कथ्यते पुरा।
कोटिप्रमाणकग्रन्थं विद्यापीठं प्रचक्षते ॥१॥
लक्षं वा सहितं[1] वापि पूजयेच्छिववत्सदा[2]।
मुख्यः सदाशिवस्तत्र शिवादिगुग्वस्ततः ॥२॥
सत्वादिगुणसम्पन्नाः शिवज्ञानावतारकाः।
विद्येश्वरादयश्चान्ये पूज्याः स्युः पुस्तके तथा ॥३॥
आगमानामथो वक्ष्ये भेदं सङ्क्षेपतः क्रामात्।
डैवं च पाञ्चरात्रं च बौद्धमार्हतकं तथा ॥४॥
चतुर्धा समया भिन्नास्तेषु शैवं प्रधानमम्।
शैवं प्राशुपतं सोमं लकुलं च[3] चतुर्विधम् ॥५॥
तेषु शैवं शुभं ज्ञेयं रौद्रं पाशुपतादिकम्।
शैवं पुनश्चतुर्भेदं सिद्धान्तं दक्षिणं तथा ॥६॥
वामं मिश्रमिति ज्ञेयं तेषु सिद्धान्तसुत्तमम्।
जघन्यभेदान् सन्त्यज्य शैवसिद्धन्तमुच्यते ॥७॥
अष्टाविंशतिधा भिन्नं शैवं सिद्धान्तमुत्तमम्।
सिद्धान्तं द्विविधं ज्ञेयं शैवं रौद्रमितिस्थितम् ॥८॥
दशधा शिवभेदाः स्युः रौद्राष्टादश चोदिताः।
पाञ्चरात्रादि भेदेषु तथा पाशुपतादिषु ॥९॥

---

[1] संहितां । [2] समम् । [3] तत् c

सिद्धान्तसङ्करं प्राज्ञो न कुर्याद्दोषकृद्यतः।
अष्टाविंशतिभेदस्य[1] सिद्धान्तस्यैकतन्त्रता ॥१०॥
तस्मान्नदोषकृद्येषु[2] सङ्करः कथ्यते[3] बुधैः।
येषु[4] येन समारब्धं तित्यनैमित्तिकादिकम् ॥११॥
समाप्तिस्तेन तन्त्रेण कर्तव्या तन्त्रपारगैः।
अनुक्तं यत्र यत्तन्त्रे ग्राह्यं तद्भेदतस्तु तत् ॥१२॥
तद्भेदेष्वपि यन्नोक्तं तदन्येभ्यः समाहरेत्[5]।
वक्ष्येऽथ[6] शैवसिद्धान्तमष्टाविंशतिभेदकम् ॥१३॥
कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च ह्यंशुमान् सुप्रभेदकम् ॥१४॥
विजयं चैव निश्वासं स्वायम्भुवमथानलम्।
वीरं च रौरवं चैव मकुटं विमलं तथा ॥१५॥
चन्द्रज्ञानं च बिंबं च[7] प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानशर्वोक्ते पारमेश्वरमेव च ॥१६॥
किरणं वातुलं चैवमष्टाविंशतिसंहिताः।
सदाशिवमुखेभ्यस्ताः सम्भूताः संहिता तथा ॥१७॥
सद्योजातमुखाज्जाद्याः कामिकादयः।
वामदेवमुखाज्जाताः दीप्ताद्याः पञ्च संहिताः ॥१८॥

---

[1] भेदाः स्युः a [2] स्तेषु a, त्तेषु d [3] कथितो c [4] तेषु e [5] नयेत् l [6] यथैव h [7] सुखंबिम्वं h

अघोरवक्त्रादुद्भूताः पञ्चापि विजयादयः।
पुरुषस्य[1] मुखाज्जाताः पञ्चातो रौरवादयः ॥१९॥
ईशानवदनाज्जाताः प्रोद्गीतद्यष्टसंहिताः।
शैवानां दशभेदानां श्रोतारः स्यु[2]स्त्रयस्त्रथः ॥२०॥
रौद्राष्टादशभेदानां द्वौ द्वौ शिष्यौ मतौ बुधैः।
महेशात्प्रणवः प्राप्तः प्रणवात्त्रिकलस्ततः ॥२१॥
त्रिकलाच्च हरः प्राप्तः श्रोतारः कामिकस्य ते।
सुधा भस्म विभुश्चेति श्रोतारो योगजस्य ते ॥२२॥
सुदीप्तो गोपतिश्चैवमम्बिका चिन्त्यसंहिताम्।
कारणं शर्वरुद्रश्च कारणज्ञः प्रजापतिः ॥२३॥
श्रोतारोऽजिततन्त्रस्य सुशिवाख्यशिवच्युताः।
दीप्तं बोद्धार ईशश्च त्रिमूर्त्रिश्च हुताशनः ॥२४॥
सूक्ष्मं वैश्रवणः सूक्ष्मस्तन्त्रज्ञाश्च प्रभञ्जनः।
कालो भीमश्च धर्मश्च सहस्रागमकोविदाः ॥२५॥
अम्बुरग्रो रविश्चेति श्रोतारोंशुमतस्त्रयः।
बोद्धारः सुप्रभेदस्य दशेशो विघ्नराट् शशी ॥२६॥
बोद्धारः शिवभेदानां दशानां त्रिंशदीरिताः।
अनादिः परमेशश्च श्रोतारौ विजयस्य तौ ॥२७॥

---

[1] तत्पुरुष, k पुंवक्त्रादपिसम्भूताः n, तत्पूरुषादपिसम्भूताः m [2] रस्तु i

दशार्णो गिरिजा ज्ञेयौ निश्वासज्ञौ विचक्षणौ।
स्वायम्भुवज्ञौ निधनः नलिनोद्भव[1] एव च ।।२८।।
बोद्धारावनलं तन्त्रं व्योमाख्यो ह्यग्निसंज्ञकः।
ज्ञेयो वीराख्यतन्त्रज्ञौ तेजाख्यश्च पजापतिः ।।२९।।
ब्रह्मेशनन्दिनौ प्रोक्तौ श्रोतारौ रौरवस्य तौ।
शिवाख्यश्च महादेवौ मकुटागमकोविदौ ।।३०।।
सर्वात्मकश्च विमलं श्रोतारौ वीरभद्रकः।
चन्द्रज्ञानस्य[2] बोद्धागवनन्तश्च बृहस्पतिः ।।३१।।
प्रशान्तोऽथ दधीतिश्च सुखबिम्बविशारदौ।
शूली कवच इत्येतौ प्रोद्गीतं तन्त्रमागतम् ।।३२।।
ज्ञातारौ ललितं तन्त्रं लयाख्यो[3] रुद्रभैरवः[4]।
बोद्धारौ सिद्धतन्त्रस्य वीर[5] चण्डेश्वरौ मतौ ।।३३।।
सन्तानतन्त्रबोद्धारौ शिवनिष्ठांसवासिनौ[6]।
सोमदेवो नृसिंहश्च शर्वोक्तं तन्त्रमाश्रितौ ।।३४।।
श्रीदेवी चोशनाः प्रोक्तौ ज्ञातारौ पारमेश्वरम्।
देवविभवसंवर्तौ ज्ञातारौ किरणागमम् ।।३५।।
शिवश्चाथ महाकालो ज्ञातारौ वातुलगमम्।
रौद्राष्टादशभेदानां षट्त्रिंशदिति कीर्तिताः ।।३६।।

---

[1] पद्मोद्भूतो d [2] ईशाख्य a [3] अलयाख्यो d [4] ललितः d [5] विन्दु a [6] असंवायौ 1

शैवं रौद्रं च बोंद्धारः[1] षष्टिः पडधिकाः स्मृताः।
महेशास्तेषु पूर्वेषां गुरुः पूर्वेषु ते यथा ॥३७॥
गुरवोऽभ्यन्तराणां स्युरन्ये शिष्या इति क्रमः।
तन्त्राणां कामिकादीनां ग्रन्थसङ्ख्या निगद्यते ॥३८॥
परार्धसङ्ख्यया ग्रन्थः कामिकः प्रथमो भवेत्।
योगजं लक्षसङ्ख्यं स्याच्चिन्त्यं शतसहस्रकम् ॥३९॥
कारणं कोटिसङ्ख्यं सथादजितं चायुतं[2] मतम्।
दीप्तं नियुतसङ्ख्यं स्वात्सूक्ष्यं स्यात्पद्मसङ्ख्यया ॥४०॥
सहसं शङ्खसङ्ख्यं स्यादंशुमान् पञ्चलक्षकम्।
त्रिकोटि सुप्रभेदः स्थाद्विजयं च त्रिकोटिकम् ॥४१॥
निश्वासं कोटिसङ्ख्यं तु सार्धत्रिकस्वयम्भुवम्[3]।
अयुतत्रयमनलं स्यान्नियुतं वीरमुच्यते ॥४२॥
रौरवं चार्बुदं चाष्ट[4] शतसाहस्रमाकुटम्।
त्रिलक्षं विमलं प्रोक्तं चन्द्रज्ञानं त्रिकोटिकम् ॥४३॥
बिम्बं शतसहस्रं तु[5] प्रोद्गीतं तु त्रिलक्षकम्।
ललितं चाष्टसाहस्रं सिद्धं स्यत्सार्धकोटिकम् ॥४४॥
सन्तानं षट्सहस्रं स्याच्छर्वोक्तं तु द्विलक्षकम्।
पारमेशं सूर्यलक्षं किरणं पञ्चकोटिकम् ॥४५॥

---

[1] अष्टाविंशति भेदानां l [2] नियुतं h [3] सार्धकोटित्रयोदश c [4] ग्रन्थं e
[5] मुखविम्वं सहस्रं च d

वातुलं शतसाहस्रं तन्त्राणां ग्रन्थमीरितम्।

अष्टाविंशतितन्त्राणां पृथग्भेदो निगद्यते ॥४६॥

3 5 6 7 4 9 1 10

सप्तार्चिर्भूतषाड्भिर्मुनिजलनिधिभिर्नन्दशीतांशुदिग्भिः

12 1 8 8 3 2 13

तिग्मार्चिः सोमभोगैर्द्विरदहुतवहैर्युगमकामर्तुनेत्रैः।

6 2 16 14 15 16 3 4 7

षड्भिर्द्वाभ्यां कलाभिर्मनुदिवसकलावह्निनाचाब्धिधात्वो

5 7 9 12

र्बाणैर्लोकैः सरन्ध्रैस्तपनसुगणितैरागमानां विभेदाः ॥४७॥

वक्तारं नारसिंहं च भैरवोत्तरमेव च।

कामिकस्य त्रयोभेदाः कीर्तितास्तन्त्रकोविदैः ॥४८॥

वीणाशिखोत्तरं तारं सुता सन्तानपारगे।

आत्मयोगमिति ख्यातं पञ्चधा योगजस्य च ॥४९॥

पापनाशं परोद्भूतं सुचिन्त्यं सुभगामृते।

वायव्यं चेति चिन्त्यस्य भेदाःस्युः षड्विधा बुधैः ॥५०॥

माहेन्द्रं पावनं दौर्गं मारणं भीमसंहिता।

विद्वेषं कारणं चेति कारणं सप्तधा स्थितम् ॥५१॥

पार्वती च परोद्भूतं प्रभूतं पद्मसंहिता।

अजितस्य चतुर्भेदाः कीर्तितास्तन्त्रकोविदैः ॥५२॥

---

[1] युक्च e [2] सन्तं h

अमेयमक्षयं चाब्जमानन्दममितौजसम्।
माधवोद्भवमाच्छाद्य[1]मसङ्ख्यं च ततोऽद्भुतम् ॥५३॥
दीप्तस्य नवभेदाःस्युः सूक्ष्यं स्यादेकभेदकम्।
अतीतममलं[2] शुद्धमप्रमेयं सुबोधकम् ॥५४॥
जातिभाग्विबुधं हस्तमलङ्कारं प्रबुद्धकम्।
सहस्राएयस्य तन्त्रस्थ भेदाःस्युर्दशधा ततः ॥५५॥
काश्यपं वासवं ब्राह्मं गौतमं नीललोहितम्।
विद्यापुराणं वासिष्ठं भूततन्त्रमथैन्द्रकम् ॥५६॥
आत्मालङ्कारमीशानोत्तरं[3] प्राकरणं त्विति।
द्वादशांशुमतो भेदाः सुप्रभेदमभेदकम् ॥५७॥
मृत्युनाशं भवं सौभ्यं कुबेरेशमथोद्भवम्।
अघोरं च महाघोरं विमलं विजयेऽष्टधा ॥५८॥
निश्वासं घोनिश्वासनयनं सुधा।
निश्वासोत्तरगुह्ये च निश्वासवदनोदयम् ॥५९॥
निश्वासकारिकाभेदा निश्वासस्याष्टधा मताः।
प्रजापतिं मतं पद्मं स्वायम्भुवमिति त्रिधा ॥६०॥
आग्नेयं व्योमसंज्ञं च द्विधा चाग्नेयमास्थितम्।
प्रस्तरं फुल्लनयनं प्रबोधं बोधबोधकम् ॥६१॥

---

[1] मत्स्याद्यं n [2] मङ्गलं h [3] नरं h

अमोहं[1] मोहसमयं[2] शाकटं शकटादिकम्।
विलेखनं च विमलं हलं भद्रं च वीरकम् ॥६२॥
भेदाः स्युः वीरतन्त्रस्य कीर्तितास्ते त्रयोदश।
कालाख्यं[3] कालदहनं रौरवं रौरवोत्तरम् ॥६३॥
महाकालमथ चिन्त्यं[4] षड्भेदा रौरवस्य तु।
मकुटस्य द्विधा भेदो माकुटं मकुटोत्तरम् ॥६४॥
अलङ्कृतं विषं रौद्रमट्टहासं वृषोदरम्।
आरेवतमतिक्रान्तं वृषपिङ्गं सुभद्रकम् ॥६५॥
आक्रान्तमर्चितं भोगमनन्ताख्यं च मारणम्।
वृषगुह्यं सुदत्तं च विमलस्य तु षोडश ॥६६॥
एकपादपुराणं च स्थाण्वाख्यं नन्दिकेश्वरम्।
श्रीमुखं सङ्करं प्रोक्तं वायव्यं शिवशासनम् ॥६७॥
शिवभद्रं कल्पभेदं[5] वारुणं शिवशेखरम्।
देवीमतं स्थिरं व्यागतं चन्द्रज्ञाने चतुर्दश ॥६८॥
अर्थालङ्कारमीशनं प्रतिबिम्बमयोगजम्।
तौटिकं तुटिनीरं च कुट्टिमं पट्टशेखरम् ॥६९॥
महाविद्यामहासारे[6] तुलाप्रत्ययनैर्ऋते।
चतुर्मुखं तुलाकोटिं संस्तोभमिति कीर्तिताः ॥७०॥

---

[1] संमोहं d [2] हाकटं a [3] कालघ्नं a [4] चेन्द्रं c [5] कलाभेदं e [6] सौरं h

मुखबिम्बस्य तन्त्रस्य भेदाः पञ्चदश क्रमात्।
शैवज्ञानं च कवचं वाराहं पिङ्गलामतम् ॥७१॥
कालज्ञानं चतुर्वेदमायुर्वेदं धनुर्धरम्।
विज्ञानमङ्कुशं गीतमातोद्यं भरतं तथा ॥७२॥
पाशबन्धं दण्डधरं सर्पदंष्ट्रमिति क्रमात्।
प्रोद्गीतं नाम तन्त्रस्य भेदाः षोडश कीर्तिताः ॥७३॥
ललितोत्तरं च ललितं कौमारं ललिते त्रयम्।
शालमौशनसं सारसङ्ग्रहं शशिमण्डलम् ॥७४॥
भेदाः सिद्धाख्यतन्त्रस्य चतुर्धा कीर्तिता बधैः।
अमरेशं सुराध्यक्षं लिङ्गाध्यक्षमसङ्ख्यकम् ॥७५॥
अनिलं शङ्कर[2] द्वन्द्वसन्ताने सप्तधामतम्।
ईशानं शिवधर्मं च शिवधर्मोत्तरं तथा ॥७६॥
दिव्यप्रणीत[3] सोमाख्ये शर्वोक्तं पञ्चधा मतम्[4]।
सामान्यं यक्षिणं हंसं मातङ्गं सुप्रयोगकम् ॥७७॥
पद्माख्यं पुष्करं[5] भेदाः सप्तधा पारमेश्वरे।
गारुडं निर्ऋतिं नीलं रूक्षं बुद्धं प्रबुद्धकम् ॥७८॥
धेनुकं भानवीयं[6] च कालाख्यं किरणे नव।
विश्वं विश्वात्मकं द्वन्द्वं कालज्ञानं महामुखम् ॥७९॥

---

[1] धनुर्वेदं a [2] शरणं i [3] प्रोक्तं च i [4] स्मृताः d [5] पुष्कलं d [6] पातवीयं c

सर्वं सर्वात्मकं शुद्धं श्रेष्ठं नित्यं प्ररोहितम्।
वातुलोत्तरमित्येते वातुले द्वादशोदिताः ॥८०॥
इत्येताः संहिताः सर्वा ह्यष्टाधिकशतद्वयम्।
शैवानामष्टपञ्चाशद्दशानामिति भेदकाः ॥८१॥
रौद्राष्टादशभेदानां शतं सार्धमुदाहृतम्।
सदाशिवशरीरस्य पादाद्यवयवाश्रिताः ॥८२॥
कामिकाद्याः संहितास्ता वक्ष्यन्तेऽथ यथाक्रमम्।
चरणौ कामिकं ज्ञेयं गुल्फौ योगजसंहिता ॥८३॥
पादाङ्गुलिव्रजं चिन्त्यं जङ्घायुग्मं च कारणम्।
अजितं जानुयुग्मं स्वादीप्तमूरुप्रदेशकम् ॥८४॥
सूक्ष्माख्यं गुह्यबीजादि सहस्रं तु कटिस्थलम्।
अंशुमान् पृष्टदेशः[1] स्यात्सुप्रभेदं तु नाभिकम् ॥८५॥
विजयं जाठरो देशो निश्वासं हृदयाश्रितम्।
स्वायम्भुवं स्तनद्वन्द्वमनलं नयनाश्रितम् ॥८६॥
वीरं कण्ठाश्रितं ज्ञेयं रौरवं श्रवणद्वयम्।
मकुटं मकुटस्थानं विमलं बाहुयुग्मकम् ॥८७॥
चन्द्रज्ञानमुरः संस्थं[2] मुखबिम्बं मुखस्थितम्।
प्रोद्गीतसंहिता जिह्वा ललितं गण्डमण्डले ॥८८॥

---

[1] भागं n [2] शास्तं n [3] सुसंस्थितम् d

सिद्धतन्त्रं ललाटं च सन्तानं कुण्डलद्वयम्।
शर्वोक्तं यज्ञसूत्रं च हारं च पारमेश्वरम् ॥८९॥
किरणं सत्नभुषाख्यं[1] नाडीमार्गे[2] तु वातुलम्।
सदाशिवशरीरस्थाः कीर्तिताः कामिकादयः ॥९०॥
परार्धलक्षेऽपि च लक्षकोटि ततोऽयुतं वै नियुतं च पद्मम्।
शङ्खेषु लक्षं च त्रिकोठियुग्मं कोटी सहार्धेन त्रिकोटिरुक्ता ॥९१॥
त्रिंशत्सहस्रं नियुतार्बुदाष्टौ शंत सहस्रं च त्रिलक्षमुक्ता।
त्रिकोटिलक्षं गुणलक्षकं च सहस्रमष्टौ च सहार्धकोटि ॥९२॥
सहस्रषट्रकं च ततौ द्विलक्षं चण्डांशुलक्षेश्वरकोटिलक्षम्।
दिव्यागमानां शिवरुद्रकाणां ग्रन्थस्य सङ्ख्या गदिता क्रमेण
शङ्खं परार्धैकमथा[3]र्बुदातो[4] व्योमार्ककोटी गजसिन्धुलक्षम्।
भूताग्नि[5]साहस्रमितीरितास्ताः शैवागमग्रन्थसमूह[6] सङ्ख्या॥९३॥
इति अगमभेदाः

कपिलार्चनविधिः

कपिलापूजनं वक्ष्ये शिवशास्रप्रचोदितम्[7]।
गावः पञ्च समायाताः शिवलोकान्महीतलम् ॥९५॥
सुनन्दा च सुभद्रा च सुशीला सुरभिस्तथा।
विमलाचेति सम्पूज्याः कपिलाः[8] सवृषास्तथा ॥९६॥

---

[1] भूषाढ्यं d [2] मार्गं l [3] माला a [4] देधो d [5] भूतादि e [6] सहस्र e [7] प्रबोधितः c [8] लाश्च d

सर्वदेवमयाश्चैताः[1] सर्वलोकस्य मातरः।
ग्रासास्ताभ्यश्च तेभ्यश्च देयास्तद्रष्यतमुत्तमम् ॥९७॥
परगोभ्यः प्रदातव्य ग्रासं तच्चोत्तमं व्रतम्।
सौरभेयि जगन्मातर्देवानाममृतप्रदे ॥९८॥
ग्रहण वरदे ग्रासमीप्सितार्थं च देहिं मे।
प्रदद्याद्ग्रासमेतेन[2] वृषमन्त्रश्च कथ्यते ॥९९॥
सर्वलोकधरा ह्येते जीवितान्नप्रदायिनः।
ग्रासं गृह्णन्तु हृष्टास्त इदं मे व्रतमुत्तमम् ॥१००॥
ग्रासं दत्त्वा नमस्कुर्यात्संस्पृशेत्पृष्ठदेशतः।
वन्दितासि वसिष्ठेन विश्वामित्रेण जह्नुना ॥१०१॥
कपिले हर मे पापं यन्मया दुष्कृतं कृतम्।
गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ॥१०२॥
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्।
इमं मन्त्रं जपेत्प्राज्ञस्त्रिसन्ध्यं प्रयतो[3] नरः ॥१०३॥
विमुक्तः सर्वपापेभ्यः शिवलोकं स गच्छति[4]।
कपिलर्चनं समाप्तम्

भोजनविधिः

भोजनस्य विधिं वक्ष्ये मध्याह्नसमये सति ॥१०४॥

---

[1] श्चैव I [2] मन्त्रेण i [3] प्रीतिनो i [4] शिवसायुज्यमामयात् i

स्नात्वा सम्पूजयेद्देवं दद्याद्वाचाष्टपुष्पिकाम्।
मृत्युञ्जयेन मन्त्रेण वौषडन्तेन सप्तधा ॥१०५॥
शङ्खस्थं दर्भसंयुक्तं पानीयमभिमन्त्रयेत्।
तेन शङ्खस्थतोयेन पाकं सर्वं समाहृतम्[1] ॥१०६॥
गोमथालिप्तगेहस्थं[2] सिञ्चेन्मृत्युञ्जयेन तम्।
पाकं च[3] सर्वपादाय तस्यार्धं शम्भवेऽर्पयेत् ॥१०७॥
अन्येनार्धेन जुहुयात्तद्विधिश्च निगद्यते[4]।
विशोध्य पूर्ववच्चुल्लीं वह्निं संहारमुद्रया ॥१०८॥
पूरकेण समादाय नाभिवह्नौ नियोजवेत्।
ऐक्यं तत्र तयोर्ध्यात्वा कुम्भकेनाग्निजतः ॥१०९॥
रेचकेन तमादाय चुल्लिवह्नौ नियोजयेत्।
शिवाग्निमसि वह्ने त्वमिति सम्प्रार्थ्य पूजयेत् ॥११०॥
अग्निः सोमश्च सूर्यश्च बृहस्पतिप्रजापती।
सर्वेदेवा विश्वेदेवाः[5] स्विष्टकृच्चाग्निरित्यमी ॥१११॥
देवाः पूज्या हृदा वह्नावन्थादीन्द्रा[6]न्ततः क्रमात्।
स्वाहान्तैराहुतीर्हुत्वा मन्त्रैरुक्तैर्विसृज्य तान् ॥११२॥
चुल्याश्च दक्षिणे धर्ममधर्मं वमके भुजे।
सम्पूज्य च बलिं दद्यात्कञ्जिन्यादिप्र[7]थोच्यते ॥११३॥

---

[1] समावृतम् d [2] देशस्यं c [3] पाकाग्रं e [4] धिस्सयन्निगत्यते 1 [5] श्र देवश्च a [6] वह्नयामीशा a
[7] क्वचिदन्यादिपू d

बलिना पूजयेत्तेन[1] वारि[2] सम्परिवर्तनम्।
जलाश्रितं च वरुणं जलभाण्डेषु पूजयेत् ॥११४॥
मुख्यद्वारे च विघ्नेशं पेषण्यां सुभगं तथा।
रौद्रीं च कोटगिरिकां[3] बलिनोलूखलेऽर्चयेत् ॥११५॥
बलभद्रः प्रियः पूज्यो मुसले बलिना ततः।
सम्मार्जन्यां च सम्पूज्यो मृत्युर्वै देवतोदिताः ॥११६॥
कामः पुष्पायुधः पूज्यः शयनीयस्य मस्तके।
स्कन्दं गृहाधिपं गेह[4]मध्यस्तम्बस्य चाप्यधः[5] ॥११७॥
सम्पूज्य बलिनाचाथ बहिर्निर्गत्य मन्दिरात्।
बलिं तु वायसादिभ्यो दत्त्वा धौताङ्घ्रिराचमेत् ॥११८॥
न्यासं कृत्वा प्रविश्यान्तर्गुप्तभोजनमन्दिरे।
शुद्धशैवः सदाचारैरसंस्पृष्टैः परस्परम् ॥११९॥
सवर्णैरेकया[6] पङ्क्त्या चोपविष्टैः समान्वितः।
आचार्यः साधकः पुत्रः समयी य यथाक्रमम् ॥१२०॥
वीरसनगतः पीठे भुञ्जीत प्राङ्मुखस्ततः[7]।
कुर्वीत भस्मरेखाभिग्रे परिहृतं ततः ॥१२१॥
शुद्धे हेमादिजे पात्रे कांस्ये साधारणेऽपि वा।
सप्तधा भस्मना शुद्धे मन्त्रिते[8]बहु[9]रूपिणा ॥१२२॥

---

[1] पूज्यते तत्र c [2] सरसं e [3] रौद्रीं प्रकोद्रगरिकां l, रौद्रीं च कोट्टगरिकां f [4] देवं l [5] चाप्यथ i
[6] रनेकया i [7] स्थितः a [8] मुद्रिते b [9] न च a

कदली चूतपालाशमधूका[1]म्भोजपत्रके।
भल्लातकार्कवातारिसर्जाश्वत्थवटै[2]र्विना ॥१२३॥
लग्ने वामकरे पात्रे जानुमध्यकरद्वयः[3]।
आज्याभिघारिते पात्रे दर्व्या दत्तं तथोदनम् ॥१२४॥
सूपशाकादिकं साज्यं[4] प्रोक्षितं चास्त्रमन्त्रतः।
मृत्युञ्जयेन मन्त्रेण सप्तधा चाभिमन्त्रयेत् ॥१२५॥
जठरं ज्वलितं ध्यायेदस्त्रमन्त्रेण चानलम्।
परिषिच्य[5] जलेनान्नमापोशनमथाचरेत् ॥१२६॥
प्राणाद्यैः प्रणवोपेतैः स्वाहान्तैराहुतिं ततः।
मन्त्रैश्च पञ्चभिर्हुत्वा प्रदीप्तं जठरानलम् ॥१२७॥
ध्यात्वा वायूप[6]वायुभ्यो नागादिभ्यो निवेद्य च।
ग्रासैः परिमितैः पश्चात्सूपयुक्तैर्घृतप्लुतैः ॥१२८॥
पूरयेदुदरस्यार्धं तदर्धमुदकेन च।
प्रणवायुप्रचारार्थं तच्छेषं च न पूरयेत् ॥१२९॥
अन्नाद्यं हस्तदत्तं च लवणं शिग्रुगृञ्जनम्।
पलाण्डुं लशुनं मांसं कतकं[7] मधु वारुणी ॥१३०॥
एवमादीनि दुष्टानि वर्जयेत्सर्वयत्नतः।
भुञ्जानो लवणं चाज्यंनाददीत कथञ्चन ॥१३१॥

---

[1] क्रमुक 1 [2] पुटैः 1 [3] तथा c [4] भक्ष्यं c [5] उपर्यभ्युक्ष्य e, पर्युवितानि ईशेन h
[6] दद्या च पाप h, द्यात्वाचायोऽय k [7] करकं e [8] चान्नं a

पीतशेषं च न पिबेद्व्याधितस्य न भक्षयेत्।
न पिबेद्विवृतास्येन पाणिना क्षालिनेन च ॥१३२॥
केशकीटादिभिर्दुष्टं त्यक्त्वाल्पं तत्प्रदेशतः।
हस्तं प्रक्षाल्य सम्प्रोक्ष्य शेषं भुञ्जीत चोदनम् ॥१३३॥
अष्टौ ग्रासा मुनेरुक्ताः षोडशारण्यवासिनाम्।
द्वात्रिंशच्च[1] गृहस्थानां यथेष्टं ब्रह्मचारिणाम् ॥१३४॥
एवमाद्यैश्च नियमैर्भुक्त्वा वाचंयमस्ततः।
अमृतापीति मन्त्रेण सलिलेन[2] च पाणिना ॥१३५॥
चुलुकार्धं[3] पिबेदम्बु शेषं भूमौ च निक्षिपेत्।
तेन नागाश्च तृप्तन्ति पाणिं प्रक्षाल्य चाचमेत् ॥१३६॥
यथावत्पुनराचम्य मुष्टिं बध्वा तु दक्षिणम्।
अङ्गुष्ठाग्रगताम्भोभिः पादङ्गुष्ठं च दक्षिणम्। ॥१३७॥
वक्ष्यमणेन मन्त्रेण सिञ्चेदात्मात्तमव्ययम्।
आत्मनो दक्षिणे पादे[4] परात्परतरो विभुः[5] ॥१३८॥
अहं तमभिषिञ्चामि[6] योङ्गुष्ठाग्रे व्यवस्थितः।
कुर्यात्कराङ्गविन्यासं भुक्तिपापविशुद्धये ॥१३९॥
बध्नीयात्परिघां मुद्रां नाभिनासापुटान्तगाम्।
भोजनस्य विधिः प्रोक्तो वक्ष्ये भिक्षाटनं विधिम् ॥१४०॥

भोजन विधिः

---

[1] योगिनश्च b [2] सलेपेन f [3] चुलुकां च a [4] भागे l [5] भुवि l [6] अन्वभिषिञ्चामि p, त्वभिगमिष्यामि h

अथ भिक्षाटन विधिः

विधिना भस्मना स्नातः परिधायोत्तरीयकम्।
कौपीनं च समाचम्य पूजयेच्च गुरुं शिशुम् ॥१४१॥
आदायाज्ञां तयोर्मौनी बहुरूपाभि[1]मन्त्रितम्।
शुद्धपात्रं समादाय दण्डं चास्त्राभिमन्त्रितम् ॥१४२॥
वामहस्तधृत[2]चछत्रो द्विजवेश्म व्रजेत्ततः।
द्विजानामप्यदुष्टानां श्रौतस्मार्तक्रियावताम् ॥१४३॥
गत्वा गृहाङ्कणं तत्र भिक्षां देहीति वाक्यतः।
उक्त्वा पूर्वं भवच्छब्दं विप्रो भिक्षामथाचरेत्[3] ॥१४४॥
मध्ये कृत्वा भवच्छब्दं भिक्षां याचेत भूपतिः।
अन्त्ये कृत्वा भवच्छब्दं वैश्यो भिक्षां समाचरेत् ॥१४५॥
एवमुक्त्वा ततस्तिष्ठेत्तावत्स्वाङ्घ्रिगतेक्षणः।
यावद्गोवत्ससंसर्गादाप्नोति प्रस्त्रवं ततः ॥१४६॥
गच्छेदन्यत्र तत्स्थानादाहृतापि[4] न चाव्रजेत्।
आनीतामाहरे[5]द्भिक्षां स्थितस्तत्रैव भिक्षुकः ॥१४७॥
न पर्णेन[6] न कांस्येन[7] न दर्व्या चाददीत ताम्।
भिक्षां च वृषलीदत्तां गर्भिण्या त्यक्त्या[8]पि वा ॥१४८॥
नग्नयावस्त्रया[9] दत्तामाददीत कदाचन।
अभिशस्तैश्च पतितैः कारुगोपालकैरपि ॥१४९॥

---

[1] रूपादि a [2] गत i [3] हरेत् i [4] आहृतादि d [5] माजये b [6] न पाणिना f [7] न रङ्गपेन h
[8] सूत्त्या k [9] न स्लानवस्रदा l

नट[1]कैवर्तकैर्दत्तां किरातैरपि तां त्यजेत्।
स्वर्णकारैयस्कारैर्मद्यमांसोपजीविभिः ॥१५०॥
दत्तां[2] देवलकाद्यैश्च त्यजेद्भिक्षा[3]मयाचिताम्।
दत्तां शुद्धैः सदाचारैर्भिभुर्भिक्षां समाहरेत् ॥१५१॥
भिक्षापात्रगतं चान्नं पवित्रं परिकीर्तितम्।
एषा माधूकरीवृत्ति[4]र्लिखिता[5] सोमसम्मिता[6] ॥१५२॥
आददानो यथा भृङ्गो मधु पुष्पं न बाधते।
अपीडयन् तथा भिक्षां गृहस्थादाहरेद्व्रती ॥१५३॥
मावूकरीं चरेद्भिक्षामपि म्लेछकुला[7]दपि।
एकान्नं न तु भुञ्जीत बृहस्पतिसमो यतिः[8] ॥१५४॥
सा चेदयाचिता भिक्षा भवेच्छतगुणोत्तरा।
अयाचकाय यद्दत्तमन्नं वा भूधनादिकम् ॥१५५॥
श्रद्धया च सदाचारैः सा भिक्षा स्यादयाचिता।
निरोधाख्यां त्यजेद्भिक्षां स्वपरप्रार्थनाबलात् ॥१५६॥
यशोधर्मक्षयकरीं नरकापादकां यतः।
एवमुक्तेन मार्गेण भिक्षामाहृत्य पूरिते ॥१५७॥
पात्रे ततः शुभं शंसन् लोकानामाव्रजेत्स्वकम्[9]।
पात्रं धृत्वा शुचौ देशे धौतपादकरो व्रती ॥१५८॥

---

[1] नागै b [2] तदा a [3] त्यजेद्दीक्षां a [4] भिश्रा 1 [5] याचिता d [6] शर्मणा d [7] गृहा e [8] यदि c
[9] मुष्टम् c, मम d

आचान्तो भस्मना स्नातः कराङ्गन्यासमाचरेत्।
अस्त्रेण प्रोक्षितां भिक्षां भिक्षामुद्दिश्य[1] हुम्फडा ॥१५९॥
मृत्युञ्जयेन मन्त्रेण भिक्षान्नममृतीकृतम्।
कृत्वा भागत्रयं दद्याद्भागमेकं च शम्भवे ॥१६०॥
द्वितीयं गुरवे भागं शेषं भुञ्जीत पूर्ववत्।
एवं भिक्षाटने प्रोक्तो विधिः शैवागमोदितः ॥१६१॥
स्वाध्यायमीप्सितं कुर्यात्सायंसन्ध्यावसानकम्।
सायं सन्ध्यामुपास्याथ शिवं सम्पूजयेत्ततः ॥१६२॥
शयनस्योचितं शुद्धमास्थाय हृदयाम्बुजे।
शयीत संस्मरन् शम्भुं योगनिद्रारतः सुधीः ॥१६३॥
निशीथेऽथ समुत्थाय भस्मस्नातः शिवं यजेत्[2]।
दिवोपनीतपानीयपुष्पाद्यैस्तु पुरोक्तवत् ॥१६४॥
सुप्त्वा[3] पुनस्तथोत्थाथ प्रातःस्नानादिकाः क्रियाः।
नित्यकाण्डसमुद्दिष्टाः कुर्वीत प्रत्यहं बुधः ॥१६५॥
श्रीकृष्णाशैवागमचक्रवर्तिनां[4] शिष्येण शैवागमतन्त्रवेदिना[5]।
श्रीविश्वनाथेन सुयज्ञकर्मणा भिक्षाटन[6]स्येह विधिः प्रभाषितः

इति श्रीकृष्णशैवागमाचार्य श्रीकृष्णपण्डितशिष्येणो भयवेदान्तिभास्करसूनुना कृताग्निष्टोमयज्ञेन विर सिद्धान्त शेखरे आगमार्चा कपिलार्चा भोजन भिक्षाटनविधानं[7] नाम चतुर्थः परिच्छेदः॥

इति नित्यकाण्डः समाप्तः

---

[1] मुद्दीप्य प्रान्त n [2] वजेन् l [3] भुक्त्वा i [4] वर्तिना i [5] तत्त्वयेदिना l [6] नित्यकाण्ड d
[7] विधानो c

முல்லைபாரதி, தஞ்சாவூர்